त्रिका० तत्कथा छायाशब्दे २९८६ पृ० दृश्या । शीर्णा-ङ्घ्रि प्रभृतयोऽप्यत्र ।

**शीर्णपुष्पी** स्त्री शीर्णं पुष्पमस्याः ङीप् । अवाकपुष्प्यां शब्दच० वा कप् । शीर्णपुष्पिका तत्रैव ।

**शीर्णमाला** स्त्री शीर्णानां माला यत्र । १पृश्निपर्ण्यां शब्दच० । कर्म० । २विशीर्णे माल्ये ।

**शीर्णवृन्त** न० शीर्णं वृन्तमस्य । (तरमुज) फलवृक्षे शब्दच० ।

**शीर्वि** त्रि० शॄ—क्विन् न वलोपः । १अपकारके २हिंसके च सि०कौ० ।

**शीर्ष** न० शिरस्+पृषो० शीर्षादेशः शॄ—क सुक् च वा । १मस्तके अमरः । २कृष्णागुरुणि राजनि० । शसादौ शीर्ष्णः शीर्ष्णा इत्यादि ।

**शीर्षक** न० शीर्षं कायति कै—क । १शिरस्त्राणे (टोपर) २शिरोऽस्थ्नि राजनि० । ३जयपराजयपत्त्रसाध्यदण्डभेदे "शीर्षकस्थेऽभियोक्तारि" याज्ञ० स्मृतिः । स्वार्थे क । ४मस्तके न० । तेन कायति कै—क । ५राहुग्रहे शब्दर०

**शीर्षच्छेद्य(दिक)** त्रि० शीर्षच्छेदमर्हति यत् ठञ् वा । वध्ये "शीर्षच्छेद्यमतोऽहं त्वाम्" भट्टिः ।

**शीर्षण्य** पु० शीर्षे बध्यते शीर्ष+यत् शीर्षन्नादेशः । १शिर-स्त्राणे अमरः । शीर्षे भवः यत् । २विशदकेशे पु०अमरः ३विशदकेशयुते त्रि० ।

**शीर्षरक्ष** न० शीर्षं रक्षति रक्ष—अण् । शिरस्त्राणे हारा० ।

**शील** समाधौ भ्वा० पर०सक० सेट् । शीलति अशीलीत् । "सरसीः परिशीलितु मया" नैषधम् । समाधिरत्र सेवा तत्र सक० प्रवृत्तिभेदो वा तत्र अक० । शीत् वर्त्त-माने क्त । [शीलयति ते अशिशीलत् त ।

**शील** अभ्यासे अतिशायने च अद० चु० उभ० सक० सेट् ।

**शील** न० शील—अच् । १स्वभावे २सद्वृत्ते मेदि० ३चरित्रभेदे ४अजगरसर्पे पुंस्त्री०शब्दच० स्त्रियां ङीप् । सद्वृत्तशीलञ्च त्रयोदशविधं हारीतोक्तं यथा "ब्रह्मण्यता१ देवपितृभ-क्तता२ सौम्यता३ अपरोपतापिता४ अनसूयता५ मृदुता६ अपारुष्यं७ मैत्रता८ प्रियवादिता९ कृतज्ञता१० शरण्य-ता११ कारुण्यता१२ प्रशान्तिश्चेति १३त्रयोदशविधं शीलम् । ५रागद्वेषपरित्यागे मनुटी० गोविन्दराजः । ६कौण्डि-न्यमुनिपत्न्यां स्त्री ।

**शीलन** न० शी—ल्युट् । १अभ्यासे २अतिशायने ३प्रवर्त्तने च

**शीलित** त्रि० शील—क्त । १अभ्यस्ते २चीर्णे च त्रिका० ।

**शीलिन्** पु० शी—क्विप् । अजगरसर्पे त्रिका० ।

**शुक** गतौ भ्वा० पर० सक० सेट् । शोकति अशोकीत् ।

**शुक** न० शुक—क । १ग्रन्थिपर्णे अमरः । २वस्त्रे ३वस्त्राञ्चले ४शिरस्त्राणे हेमच० । ५व्यासपुत्रे "पराशरकुलोत्पन्नः शुकोनाम महायशाः । व्यासादरण्यां संभूतो विधूमोऽ-ग्निरिव ज्वलन्" वह्निपु० । (शुया) इति ख्याते ६खगभेदे पु० स्त्री स्त्रियां ङीष् । शुकदर्शनशुभादिकं वसन्तराज-शाकुने उक्तं यथा "वामः पठन् राजशुकः प्रयाणे शुभं भवेद् दक्षिणतः प्रवेशे । वनेचराः काष्ठशुकाः प्रयाहुः सुसिद्धिदाः सम्मुखमापतन्तः" । ७रावणामात्यभेदे ८शि-रीषवृक्षे (पेयालकाँटा) ९वृक्षे रत्नमा० १०कश्यपपत्न्या-स्ताम्रायाः कन्याभेदे स्त्री ङीष् । "काकीं श्येनीं तथा भासीं धृतराष्ट्रीं तथा शुकीम् । ताम्रा तु सुषुवे देवी पञ्चैता लोकविश्रुताः" भा०आ० ६६अ० ।

**शुकच्छद** न०शुकस्य छदइव छदो दलमस्य । ग्रन्थिपर्णे जटा०

**शुकजिह्वा** स्त्री शुकस्य जिह्वेव पर्णमस्याः । (शुयाठोँटी) वृक्षे रत्नमा० । [दयोऽप्यत्र ।

**शुकतरु** पु० शुकप्रियस्तरुः । शिरीषवृक्षे रत्नमा० । शुकद्रुमा-

**शुकदेव** पु० व्यासपुत्रे मुनिभेदे । [शुकजिह्वावृक्षे रत्नमा० ।

**शुकनामन्** पु० शुकः शुकजिह्वा नामास्य मध्यपदलोपः ।

**शुकनाशन** पु० शुकं नाशयति नश—णिच्-ल्यु । दद्रुघ्ने वृक्षे राजनि० ।

**शुकनास** पु० शुकस्य नासेव पत्त्रमस्याः । श्योणाकवृक्षे अमरः । २शुकतुल्यनासायुक्ते त्रि० । ३कादम्बरीप्रख्य-प्रसिद्धे तारापीडनृपमन्त्रिभेदे पु० । [शब्दच० ।

**शुकपिण्डी** पु० शुकानां प्रिया पिण्डीव । शुकशिम्ब्यां

**शुकपुच्छ** पु० शुकस्य पुच्छइव । १गन्धके हेमच० । ६त० । २शुकस्य पुच्छे पु० । [राजनि० ।

**शुकपुष्प** पु० शुकइव हरित् पुष्पमस्य । १शिरीषवृक्षे

**शुकप्रिय** पु० ६त० । १शिरीषवृक्षे भावप्र० । २जम्ब्वां स्त्री राजनि० ।

**शुकफल** पु०शुकइव फलमस्य । अर्कवृक्षे राजनि० [शब्दच०

**शुकवर्ह** न० शुकस्येव वर्होऽस्य । गन्धद्रव्यभेदे (गँठियाला)

**शुकवल्लभ** पु० ६त० । १दाडिमवृक्षे राजनि० ६त० । तस्य २प्रिये त्रि० । [शब्दर० ।

**शुकशि(सि)म्बी** स्त्री शुकइव शि(सि)म्बी । कपिकच्छ्वां

**शुकादन** पु० शुकैरद्यते अद—ल्युट् । दाडिमे शब्दच० ।

**शुकानना** स्त्री शुकस्याननमिव पत्त्रमस्याः । (शुयाठोँटी) वृक्षे रत्नमा० ।